# ShrirAma Vijayatetarama Stotram or Shrirama Mantraraja Stotram

# श्रीरामोविजयतेतरामस्तोत्रं अथवा श्रीराममन्त्रराजस्तोत्रम्

## Document Information

Text title : ShrirAma Vijayatetarama Stotram or Shrirama Mantraraja Stotram

File name : shrIrAmovijayetetarAmastotram.itx

Category : raama, shrIdharasvAmI, mantra

Location : doc_raama

Author : Shridharaswami

Transliterated by : Sonali Upendra Dasare

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: https://shridharamrut.com

Latest update : November 3, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# श्रीरामोविजयतेतरामस्तोत्रं अथवा श्रीराममन्त्रराजस्तोत्रम्

“श्रीराम जय राम जय जय राम” तारकमन्त्रात्मकम् ।

श्रीरामः श्रीकरः श्रीदः श्रीसेव्यः श्रीनिकेतनः ।
राक्षसान्तकरो धीरो भक्तभाग्यविवर्धनः ॥ १॥

मरेति व्यस्तंयन्नाम जपन् व्याधोऽभवदृषिः ।
जन्मदुःखनुदं काव्यं दिव्यं व्यरचयन्महत् ॥ २॥

यदा यदा भवेद्ग्लानिर्धर्मस्य स तदा तदा ।
राक्षसान्तकरो रामो सम्भवत्यात्ममायया ॥ ३॥

महामोहकरी माया यत्प्रसादाद्विनश्यति ।
जघन्या अपि पूज्याश्च पावना बहवोऽभवन् ॥ ४॥

यस्य प्रसादतो जातो हनूमान् महतो महान् ।
जन्ममृत्युजरादुःखान्मुक्तोऽद्यापि विराजते ॥ ५॥

यस्मात्परतरन्नास्ति यस्य नाम महद्यशः ।
रामं लोकाभिरामं तं व्रजामः शरणं मुदा ॥ ६॥

मैतयिति नः सर्वान् संसारात्तारयिष्यति ।
श्री राम जयरामेति जयजयेति जपाद्ध्रुवम् ॥ ७॥

राम एव परम्ब्रह्म राम एव परागतिः ।
मनः शान्तिकरोरामो मन्मथारि नमस्कृतः ॥ ८॥

जयत्रययुतः श्रेष्ठो रामत्रययुतो मनुः ।
यत्र श्रीराममहिमा त्रिसत्यमिति वर्ण्यते ॥ ९॥

रामः श्रीसीतया युक्तः सर्वैश्वर्यंव् इत्यपि ।
महत्वमस्यानन्तं यत् तच्छ्रीरामपदे स्थितम् ॥ १०॥

जय रामपदेनायं जयरूप इतीर्यते ।

यतोऽसौ जयरूपो हि जयार्हो जयदस्तथा ॥ ११॥

जयजयेति पदेऽर्थोऽयं द्योतते सर्वसिद्धिदः ।
य स्मिन्न माया नाविद्यां तस्मिन्मोहःकथं भवेत् ॥ १२॥

रामत्रये दाशरथिश्चेशो ब्रह्मेति कथ्यते ।
मरूदात्मजसन्त्राता मोचयेन्मन्दनादपि ॥ १३॥

श्री रामेति पदं पूर्वं जयरामेति वै ततः ।
रामोऽत्र द्विर्जयात्पश्चाद्वर्तते मनुराजके ॥ १४॥

महासंसारव्यामोहान्मोचयत्याश्चयं मनुः ।
जपनीयः कीर्तनीयो मुदा सर्वैश्च सर्वदा ॥ १५॥

यज्ञराक्षसभूताद्या पीडाऽनेन विनश्यति ।
रामो धनुर्धरो नित्यं संरक्षति पदे पदे ॥ १६॥

मदोन्मत्तनरैश्चापि न दुःख लभते कदा ।
जन्मसन्तापचन्द्रोऽयं ज्ञानविज्ञानदो मनुः ॥ १७॥

यत्रकुत्रापिजप्योऽयं शुचिर्वाप्यशुचिस्तथा ।
जपतःशान्तिमाप्नोति प्रशस्तोऽस्मिन्कलौमतः ॥ १८॥

यज्ञानां जपयज्ञोऽस्मि भगवद्वाक्यमीदृशम् ।
रामेणैव पुरादिष्टः षडङ्गादिविवर्जितः ॥ १९॥

मरूत्सुतावताराय रामदासाय धीमते ।
श्रीरामवरयुक्तोऽयं सुलभोऽपि फलाधिकः ॥ २०॥

त्रैलोक्यपावनी पुण्या मुक्तिदाराघवस्तुतिः ।
भद्रं तनोतु लोकेषु गङ्गेव किल सर्वदा ॥

इति श्रीमत् परमहंस परिव्राजकाचार्य सदगुरू भगवान श्री
श्रीधरस्वामीमहाराजविरचीतं श्रीरामोविजयतेतरामस्तोत्रं
अथवा श्रीराममन्त्रराजस्तोत्रं सम्पूर्णम् ॥

रचनास्थल अयोध्या

Encoded and proofread by sonAlI upendra dasare

*ShrirAma Vijayatetarama Stotram or Shrirama Mantraraja Stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*